# ॥ श्री आदिमाता अशुभनाशिनी स्तवनम् ॥

प्रणवमाते गतित्राते गय:त्राते भर्गमालिनी ।
पापनाशिनी चण्डिके श्रीगायत्रि नमोऽस्तु ते ॥१॥
त्रिमूर्तिमाते पतिव्रते प्रेमत्राते तपमालिनी ।
दु:खनाशिनी चण्डिके अनसूये नमोऽस्तु ते ॥२॥
भावस्था त्वं नामाधारा नादस्था मन्त्रमालिनी ।
अशुभनाशिनी चण्डिके महिषासुरमर्दिनी नमोऽस्तु ते ॥३॥
सर्वबाधाप्रशमनं त्रैलोकस्य अखिलेश्वरी ।
एवमेव त्वया कार्यं अस्मद्वैरिविनाशनम् ॥४॥
पिशाचदैत्यदुर्मान्त्रिकादि-सर्वशत्रुविनाशिनी ।
ॐ नमश्चण्डिकायै नमश्चण्डिकायै नमश्चण्डिकायै रक्ष रक्ष परमेश्वरी ॥५॥
रोगानशेषान् अपहंसि तुष्टा रुष्टा तु कामान् सकलान् अभिष्टान् ।
ॐ नमश्चण्डिकायै नमश्चण्डिकायै नमश्चण्डिकायै क्षमस्व मे परमेश्वरी ॥६॥
त्वां आश्रितानां न विपन्नराणां त्वां आश्रिता ह्याश्रेयतां प्रयान्ति ।
ॐ नमश्चण्डिकायै नमश्चण्डिकायै नमश्चण्डिकायै प्रसीद मे परमेश्वरी ॥७॥
अष्टादशभुजे त्रिधे श्रीदुर्गे सिंहवाहिनी ।
भयेभ्यस्राहि नो देवि शुभंकरे नमोऽस्तु ते ॥८॥
पापोऽहं पापकर्माऽहं पापात्मा पापसंभव: ।
त्राहि मां आदिमाते सर्वपापहरा भव ॥९॥